## ।। अथ एकादशोऽध्याय: ।।

Chapter -11

वसिष्ठ उवाच :- अथागतेषु विप्रेषु नानाश्रमनिवासिषु ।।
स्मितभिन्नाधरपुटा श्रीरुवाच जनार्दनम् ।। १

श्री रुवाच :- अशेषभुवनाधार सर्वज्ञाननिकेतन ।।
एतेषु सन्निविष्टेषु कथमर्थ: प्रदीयताम् ।। २

श्री भगवानुवाच:- उपहारैर्गृहान्पूर्वं संपूज्य विधिवत्तत: ।।
प्रशंसंति द्विजा दानमिति मार्ग: सनातन: ।। ३

इत्युक्त्वा जगतां धात्री निधीनष्टौ समादिशत् ।
स्थित्यर्थं भूमिदेवानां गृहेषु नृपसत्तम ।। ४

निधयस्ते यथादिष्टं चक्रुर्देव्या वचस्तदा ।।
वांछितैर्वसुभि: सर्वं तत्पुरमपूरयन् ।। ५

ततोऽवर्वस्तुसाराणि तानि गेहानि रेजिरे ।।
उदितज्ञानसाराणि हृदयानीव योगिनाम् ।। ६

----

ई वी १ एषुसं, ई बी २ प्रसंसं, ई बी ३ म:, ई बी ४ दिष्टं,
ई वी ५ ततोनरवस्तु, -ई- ततोलवस्तु - ~~ए ततोलवस्तु~~
ई वी -६ गिनं
( ए १) धि, ( ए २) मै, ( ए ३) ष्टां, ( ए ४) तु

अत्रत्र्यंबके तीर्थे गौतमीये च सोमपान् ।।
कृतस्नानानुपाचांतान् जाह्नव्याभिवंद्य ह ।। ७

विलोकयामास मुखं जगद्भर्तुर्जगद्धिता ।।
अथ विज्ञापयामास नारदो मधुसूदनम् ।। ८

नारद उवाच :- अर्घदान मिदं देव देवीकर्तुमिहेच्छति ।।
सर्वेभ्यो वेदविद्भ्य स्तद् भवान्कर्तुमर्हति ।।
त्राता सर्वस्य लोकस्य भगवान्धर्मदर्शकः ।।
त्वं गतिर्जगतां विष्णो मुनीनां च महात्मनाम् ।। १०

माननीया महात्मानस्तव सर्वे तपस्विनः ।।
त्वयैव मानिता ह्येते पूज्यंतेमानवैर्भुवि ।। ११

वसिष्ठ उवाच :- एतत् श्रुत्वा महाराज मुरजिन्मुनिभाषितम् ।।
श्राद्धदेऽर्घं द्विजातिभ्यो विधिवद् ब्राह्मणप्रियः ।। १२

----

ई बी थिते, ई -१ अथत्र्यंबके तीर्थे गौतमीश्च र अत्रत्र्यंबके
ई अथविज्ञापयामास नारदोमधुसूदनम् - अर्घदानमिदंदेवदेवी -
कर्तुमिहेच्छति
ई -२ मर्हति ( ए १) सि ( ए २) त्राता

ततो गृहीतमात्रेऽर्घे ब्रह्मा विष्णुमवोचत ॥
पंचाशदिहपंचोन सहस्त्राणि द्विजन्मनां ॥
यं वेत्सि वरमेतेषामर्घं तस्मै कुरु प्रभो ॥ १३

श्री कंठ उवाच :- अध्यर्मेणां हिंसदुवृत्तं मध्यर्मेणां हरे कुलम् ॥
तदमीषां वरं मत्वा ददस्वार्घमधोक्षज ॥ १४

वृहस्पति रुवाच :- वयसा तपसा चैव विद्यया चरणेन च ॥
एते यमनुमन्यंते तस्मै यच्छार्घमच्युत ॥ १५

तन्निशम्य द्विजा: सर्वे प्रसन्नवदनांबुजा: ॥
ऊचुर्यज्ञेश्वरं देवमनंतं विश्वरूपिणाम् ॥ १६

सारस्वता ऊचु:- न हायनै र्नवलिभिर्नचास्य पलितं शिर: ॥
कृष्णयश्चक्रिरेधर्मं योऽनूचान: स नो महान् ॥ १७

वयसा तपसा चैव विद्यया चरणेन च ।
देव श्रेष्ठतमोऽस्माकं गौतमोऽर्घमिहार्हति ॥ १८

----

ई बी १ चा, ई बी २ षांअर्घ, ई बी ३ हरे: कुलं, ई बी ४ दत्वादतस्वार्घमधोक्षज:, ई बी ५ क्रियेरे, ई बी ६ विद्ययातपसाचैव वयसाचरणेनत्, ई बी ७ सि - ई वृहस्पतिरुवाच: वयसातपसाचैव विद्याया-चरणेनच एतेय अनुमन्यंते तस्मैयच्छार्घमच्युत ॥ १५ ॥
तन्निशम्यद्विजा: ।
(ए १) ना
(ए २) रू
(ए ३) योनुवान:

वात्स्यायना ऊचु :- सद्वृत्तास्तपतां[इ1]श्रेष्ठाः द्विजपुत्राः सहस्त्रशः ।।
वेदानधिजगु[ए1]र्य[ई1]स्मादर्घमर्हति गौतमः ।। १९

वसिष्ठा ऊचु :- पुरा कृ[इ2]त्वा तपस्तीव्रमिमां भूमिं पुनाति यः ।।
महर्षिसंमतो लोके गौतमोऽर्घमिहार्हति ।। २०

आत्रेया ऊचुः- सापराधं[इ3] हरिं शप्त्वा गत्वा च तुहिनाचलम्[ई2] ।।
तपोलक्ष्मीं[ई3] पुनस्फीतां यश्चक्रे सोऽर्घ्यं गौतमः ।। २१

आंगिरसा ऊचुः- अयमस्मत्कुलश्रेष्ठो वाग्मी वेदार्थ-वित्तमः ।।
प्रणेता चागमाधीनामतो[ई4]ऽर्घं गौतमोऽर्हति ।। २२

अपरे ऊचुः- नारायण सुरश्रेष्ठ शंखचक्रगदाधर ।।
अर्हत्तमपरिज्ञाने त्वं प्रमाणमिहासि नः ।। २३

वसिष्ठ उवाच :- इत्येवं सुरविप्रेन्द्रैः स्तूयमाने हि गौतमे ।।
ऊचुरीर्ष्याल[ई5]वः केचित्सैंधवारण्य[ई6]वासिनः ।। २४

मां मां गौतमकेनासि श्रेष्ठोऽस्माकं गणेन वै ।।
तद्ब्रूहि यदि वेदे[ई]षु प्रावीण्य[ए2]मकलंजसे ।। २५

---

ई बी १ वेदनधिजगुर्य ई बी ५ ण्य १ ई श्रेष्टा
ई बी २ हिमाचलं ई बी ६ न २ ई पुराकृत्वा
ई बी ३ लक्ष्मीं ३ ई शप्ता
ई बी ४ कृतोर्ध
( ए १) वेदानधिगु ( ए २) वि

इति तेषां वचः श्रुत्वा हुंकारवशवर्तिनां ।।
राजन्नांगिरसाः सर्वे शेपुस्तान्सिंधुजान्द्विजान् ।। २६

अंगिरसा ऊचुः- यथावच्चरितं मेधां शतशो मुनिपुत्रकैः ।।
तमृषिं द्विषतो युष्मान्न वेदः संश्रयिष्यति ।। २७

वसिष्ठ उवाच :- इत्थमांगिरसैः विप्रैर्वेदबाह्या कृता नृप ।।
सिंधुदेशं तदा जग्मुः सैंधवारण्यवासिनः ।। २८

गतेषु तेषु विप्रेषु सैन्धवेषु नरेश्वर ।।
गौतमार्यचकाराधर्ममच्युतः सर्वसम्मतेः ।। २९

विदधे विश्वकृत्तत्र गौतमाश्रमसन्निधौ ।।
मंडपं विष्णुनाज्ञप्तो हेमस्तंभान्वितं शुभम् ।। ३०

वैदूर्यहेमपट्टेषु तत्रासीनान्द्विजोत्तमान् ।।
नारदोऽभ्यर्चयामास सदारान् पुष्पचंदनैः ।। ३१

---

ई बी १ वेदवाद्याः ज्ञतानृपः
ई बी २ षुसैंधवेषु
ई बी ३ संगते
ई बी ४ द्विजत्मनः
ई बी १ नाज्ञाप्तं
( ए १) ब्राह्मा

जी१
मणिवैदूर्यसंच्छन्नै जांबूनदविभूषणै: ।।
तानलंकारयामास सदारान्नरवाहन: ।। ३३
पुरस्कृतस्तु तैरेव समस्तैरपि गौतम ।
मंडपान्तर्गतां वेदी [illegible] माविवेशाज्ञया हरेः ।। ३३
स तदाहिल्यया सार्द्ध निविष्टो वेदिकांतरे ।।
ए१
ग्राहितो हरिणा राजन् मधुपर्कादिका: क्रिया: ।। ३४

ततो हैममयीं पाणौ वारिधानीं हरिप्रिया ।।
बिभ्राणा पादशौचार्थं पार्श्वे तस्थौ मधुद्विषा: ।। ३५

जी३
देवदुंदुभयो नेदुरंबरे मधुरस्वरा: ।।
तुंबरुप्रमुखा: सर्वे जगु: कलमतंद्रिता: ।। ३६

दध्मु: शंखानसंख्येयान् पूरितो वैष्णवा गणा: ।।
तदा राजन् मुनीन्द्राणां वेदध्वनिरुदीरित: ।।
बभूवोपरि सर्वेषां तदद्भुतमिवाभवत् ।। ३७
ब्रह्मा
विधिं चकार भगवान् ब्रह्मलोकपितामह: ।। ३८
अभ्यर्थितो महाराज विष्णुना शंकरेण च ।।
अथोवाच जगन्नाथ: कुशानादाय वारि च ।। ३९

----

ई बी जांबुनद ( ए ) १- न्मधुपर्का
पुरस्कृत रक्ततेरे व समस्तैर पिगौतम:
मंडपांतर्गतांदेवीमाविवेशा ज्ञया हरे: । ई बी २ पार्श्वे
ई बी ३ ना:

भगवानुवाच :- सर्वोपस्करपूर्णानि गृहाणीमानि गौतम ।।
एतेभ्यो द्विजवर्येभ्यो दास्यामि श्रेयसे श्रिय: ।। ४०

सर्वदेवमयो विष्णु: श्रीनिवासं तथा गृहम् ।
ततो वै गृहदानेन प्रीत: स्याद्धरणीधर: ।। ४१

एतानि सोपहाराणि गृहाणि विविधानि च ।।
वेदविद्भ्यो द्विजेंद्रेभ्य: प्रददे श्रेयसे श्रिय: ।। ४२

वसिष्ठ उवाच :- इत्युच्चार्य चतुर्बाहुर्गौतमस्य तपस्विन: ।।
पाणौ जलं प्रचिक्षेप सह राजन् कुशाक्षतै: ।। ४३

तत: प्रीतमना देवी द्विजेंद्रानिदमब्रवीत् ।। ४४

श्री रुवाच :- विष्णुर्ब्राह्मणरूपेण पुनाति जगतीमिमाम् ।।
पूजितेषु द्विजेंद्रेषु पूजित: स्याज्जनार्दन: ।। ४५

अनेन ब्रह्मपुर्यर्थं दानेन मम सोमपा: ।।
प्रीतोऽस्तु सततं विष्णु: प्रसादाद् भवतां मम ।। ४६

---

( ए १) रू
( ए २) जगतिमिमां
( ए ३) न
( ए ४) ब्रह्मपुरीणां
( ए ५) प्रीतोस्तु

वसिष्ठ उवाच :- इत्युक्ते जगतां मात्रा द्विजा ऊचुस्तथाऽस्त्विति ।। ४७

प्रददौ मधुहा तेभ्यो भूमिपाल चतुर्दिशि[ए १] ।।
कोटिकोटीः सुवर्णस्य रत्नसंख्या न विद्यते ।। ४८

अलंकृता मणिस्त्रग्भिः कांचनाभरणैस्तथा ।।
दुकूलवासस: सर्वे पुष्पचंदनचर्चिता: ।। ४९

मंत्रपूतैः श्रिया सार्द्धं हरिं सिष्चिचुरक्षतैः[ए २] ।।
श्रीमालानुगा व्योम्नः पुष्पवृष्टिः पपात ह ।। ५०

जातरूपमयैः छत्रैः हंसपक्षातिसन्निभैः ।।
पद्मायितामिव महीं कुर्वाणा विविशुर्गृहान् ।। ५१

तदा देवा द्विजेंद्राश्च ब्रह्मेशानजनार्दनाः ।।
मुदिता जगदुर्देवाः प्रसन्नमुखदृष्टयः ।। ५२

देवाऊचु :- अंशांशेन वयं देवि सर्वे स्थास्यामहे ध्रुवम् ।
श्रीमाले प्रवरे क्षेत्रे प्रीतये तव वैष्णवि ।। ५३

---

( ए १) चतस्त्रो नृपते दिशि
( ए २) सिषिंचुरक्षतैः

यत्र श्रीमालिनो विप्रान् पूजयिष्यंति मानवा: ।।
तेषामभीप्सितान् कामान् साधयिष्यामहे वयम् ।। ५४

हवींषि यत्र होष्यंति जना: श्रीमालवासिन: ।।
तत्र ब्रह्मादयो देवा देवि दास्यंति वांछितम् ।। ५५

श्रीमालिनो द्विजा: श्रेष्ठा: सत्कृता: सर्वदैवतै: ।।
येऽर्चयिष्यंति देवेशि तेषां स्वर्गो न दुर्लभ: ।। ५६

श्रीमालिनो द्विजान्श्राद्धे प्रीणायिष्यंति[प१] ये नरा: ।।
संतुष्टा: पितरस्तेभ्यो दास्यंति मनसेप्सितान् ।। ५७

श्रीरस्य जातो मूलं देवतानां त्रिविष्टपाणि ।।
तयार्हतु ये द्विजा मान्यास्तेभ्यो नास्त्यधिकं भुवि ।। ५८

ये वै श्रीमालमासाद्य यजिष्यंति मनीषिणा: ।।
तेभ्यो विष्णुर्निजं लोकं परितुष्ट: प्रदास्यति ।। ५९

ब्रह्मोवाच :- भूतानि भूतधात्रीयं यावद्देवि धरिष्यति ।।
स्थास्यामि तावदत्राहं प्रीतये तव भार्गवि ।। ६०

----

( प १) प्रीणायिष्यंति

विष्णु रुवाच :- अत्र स्थितिं करिष्यामि केनचित्कारणेन वै ।।
अवतीर्णो वरारोहे प्रीणनाय शरीरिणाम् ।। ६१

रूद्र उवाच :- यदा चंडो महादैत्य: पृथिवीं तापयिष्यिति ।।
तदाहं तद्वधार्थाय वत्स्यामीह सुरेश्वरि ।। ६२

इति श्रुत्वा ततो देवी द्विजानाह शुभां गिराम् ।। ६३

देव्यु वाच :- वरदाहं द्विजश्रेष्ठा वरं वृणुत मा चिरम् ।।
दास्यामि तन्न संदेहो यद्यपि स्यात्सुदुर्लभम् ।। ६४

द्विजाऊचु:- नमस्ते देवि देवेशि वरदे विश्वरूपिणि ।।
यदि देयो वरो स्माकंऽतदिदं कुरु सम्मतम् ।। ६५

इयं ब्रह्मपुरी मातस्त्वया त्याज्या नहि क्वचित् ।।
त्वयि संतिष्ठमानायां सर्वास्तिष्ठंति देवता: ।। ६६

इयं तु पृथिवी मातस्त्वया दत्ता द्विजन्मनाम् ।।
नहि पालयितुं शक्ता ब्राह्मणा देवि मेदिनीम् ।। ६७

---

ई बी १ हो, ई बी २ तथा, ई बी ३ मे ए(२) स्थात

( ए १) देवशि

( ए२) वरदेविश्वरूपिणि

( ए३) सत्तम:

तपः स्वाध्यायनिष्ठानां द्विजानां विष्णुवल्लभे ।।
गावः श्रेष्ठाः पशूनां हि यज्ञियं परमं धनम् ।।
गवां च ब्राह्मणानां च कुलमेकं द्विधा कृतम् ।। ६८

तस्माद् गावः प्रदेयास्ते पृथिव्या देवि निष्कृतिः ।।
एतदिच्छंति भूदेवा स्त्वया कृतमनिंदिते ।। ६९

देव्युवाच :- सदाहमत्र वत्स्यामि निजांशैनद्विजोत्तमाः ।।
हिताय सर्वदेवानां युष्माकं हर्षवृद्धये ।। ७०

नमिष्यन्ति नरोत्तमाः ।।
इह स्थितां मां ये नित्यं नंस्यन्ति मनुजोत्तमाः ।।
कदाचिदपि मा तेषां गृहे दौस्थ्यं भविष्यति ।। ७१

श्रीमालेऽहं निवत्स्यामि श्रीमालं दयितं मम ।।
श्रीमाले ये निवत्स्यन्ति ते भविष्यंति मे प्रियाः ।। ७२

इत्युक्त्वा तान्द्विजान्देवी गोविन्दमिदमब्रवीत् ।
वांछंति निष्कृतिं देव पृथिव्याः सोमपायिनः ।।
तदर्थं गोप्रदानं हि एतेषां कुरु केशव ।। ७३

----

बी १ भं, बी २ श्रेष्टा, बी ३ य, बी ४- नमस्यं, बी ५ त्तमः

नैषाधर्मैभिर्वर्द्धेविपृथ्वीपरिपालनं गावः श्रेष्टा पश्चूनांह्यिज्ञियपरमंधनं ।।

( ए १) निजांशैना
( ए २) नमिष्यन्तिनरोत्तमाः

तच्छ्रु-

वशिष्ठ उवाच :(कृत्वा) विदधे ध्यानाद्योगिध्येयो जनार्दन: ।।
धेनूनां चतुरो लक्षान् नानावर्णान्सुरेश्वर ।। ७४

ता: सवत्सा: सुपुष्टांग्यो हुंकृतिध्वस्तपातका: ।।
चक्रुर्विचित्रितां भूमिं श्रीमालस्य समंतत: ।। ७५

प्रददौ द्विजवर्येभ्यो देवीभृगुतनूद्भवा ।।
तां[बी १]प्रपद्य द्विजन्मान: स्मितभिन्नोष्ठसंपुटा: ।।
स्वगृहाणि ययु: प्रीता: स्तुवंत: परमेश्वरीम् ।। ७६

देवा अपि दिवं जग्मु: सह शक्रेण[बी २] विस्मिता: ।।
अवतीर्य निजांशेन ब्रह्मा लोकपितामह: ।। ७७

ब्रह्मलोकं ययौ[ई १]राजन्नावृतो ब्रह्मवादिभि[बी ३]: ।।
शिवश्च[ई २] सह पार्वत्या कैलाश-शिखरं गत: ।। ७८

देवी तत्र विमृज्यांशमेकं[ए १] तस्थौ सदा नृप ।।
बिभ्राणा शाश्वतं रूपं[ए २] विश्वरूपा विनाशनी ।।
हरेरुत्संगमासाद्य विष्णुलोकं जगाम्र्ह ।। ७९

----

बी १ प्रपद्यां, ईबी २ ना, ई बी नि, ई -१ राजन् आवृतो ब्रह्मवादिभि:
ए ( १) श्रृगु , ह-२ अशिव

(ए१) वीमज्यां

(ए२) रूपं

ततः प्रभृति भूपाल ख्यातं श्रीमालसंज्ञया ।।
चातुर्मासी द्विजेन्द्राणां स्थानं सुरपुरोपमम् ।। ८०

इदं यः शृणुयान्मर्त्यो देव्या, ब्राह्मणपूजनं ।।
श्रीमालस्य प्रतिष्ठानं न स दुर्गतिमाप्नुयात् ।। ८१

इदं श्राव्यं प्रयत्नेन ब्राह्मणानां च संसदि ।।
धर्म्यं यशस्यमायुष्यं कामदं कीर्तिवर्धनम् ।। ८२

-०-

इतिश्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां ब्राह्म्यविभागे तृतीय परिच्छेदे श्रीमाल माहात्म्ये द्विजप्रतिष्ठापनो नाम एकादशोऽध्यायः ।। ११ ।।

-०-

ई बी १ पुरोत्तमं
ई बी २ श्रीमाली
ई बी ३ स